# संस्कृतवार्ता:

दिनाङ्क :- 24.12.2025 प्रात: - 06:55

## अथ वार्ताः

### विशेषगहनपुनरीक्षणाभियानम्-HL 2

निर्वाचनायोगेन विशेष-गहन-पुनरीक्षण-अभियानस्य अन्तर्गतं मध्य-प्रदेशस्य कृते अपि प्रारूप-मतदातृ-सूची प्रख्यापिता। आपत्तय: जनवरी द्वाविंशीं यावत् अभियाचिता: सन्ति। धेययमस्ति यत् निर्वाचनायोगेन सार्धैक-मास-पर्यन्तं गृहे गृहे विशेष-गहन-पुनरीक्षण-अभियानस्य अनन्तरम् मध्यप्रदेशस्य प्रारूप-मतदातृ-सूची प्रख्यापिता। एषा सूची राज्यस्य सर्वेभ्य: त्रिंशदुत्तर-द्वि-शत-मितेभ्य: विधानसभासनेभ्य: प्रकाशिता अस्ति। सर्वेषु मतदान-केन्द्रेषु च उपलब्धास्ति। अस्यां प्रक्रियायां मृतकानां, स्थानान्तरितानां, अनुपस्थितानां मुधा मतदातृनां जनानां च नामानि अपाकृतानि सन्ति। येषां विद्यमानानां मतदातृणां नामानि सूच्यां नैव समाविष्टानि, ते आवश्यक-प्रपत्रै: साकं जनवरी द्वाविंशीं यावत् आपत्तिं पञ्जीकर्तुम् अर्हन्ति। अंतिम- मतदातृ-सूची आगामि-वर्षस्य फरवरी एकविंशीं यावत् प्रख्यापयिष्यते। युगपदेव, केरलस्य, छत्तीसगढ़स्य अंडमान-निकोबारस्य च प्रारूप-सूचिका: अपि प्रख्यापयिष्यन्ते।

### कृषिमन्त्री शिवराजसिंहचौहानः

कृषिमन्त्री शिवराजसिंहचौहानः उक्तवान् यत् कृत्रिमबीजानां, उर्वरकाणां, मिश्रित- उर्वरकाणां च विक्रयणं नियन्त्रयितुं सर्वकारः कठोरविधेयकं प्रवर्तयितुं सज्जः अस्ति। राजस्थानस्य नागौरमण्डले कृषकसम्मेलने वदन् चौहानः अवदत् यत् संसदस्य आगामिनि सत्रे द्वौ नूतनौ विधेयकौ प्रस्तावितौ भविष्यतः। श्रीचौहान: अवदत् यत् प्रशासनं प्रधानमन्त्री फसलबीमायोजनायाः दोषान् दूरीकर्तुं अपि कार्यं कुर्वत् अस्ति।

### अमितशाह: पंचकुला यात्रा

गृहमंत्री अमित शाह : अद्य पंचकुला-यात्रायै प्रस्थास्यति। पंचकुला आरक्षि-उपायुक्ता सृष्टि-गुप्ता प्रावोचत् यत् तस्य यात्रां निधाय जनपदे सुरक्षायाम्-व्यापिका सज्जता जाता।

गृहमंत्री सहकारिणि क्षेत्रे एकस्मिन सम्मेलने, हरियाणा-आरक्षिण: पासिंग- आउट-परेड इत्यत्र पूर्वप्रधानमन्त्रिण: अटल-बिहारी वाजपेयिन: प्रतिमाया: अनावरणेन सह अनेकषु आधिकारिकेणु कार्यक्रमेषु भागं स्वीकरिष्यति।

ओडिशा

ओडिशाया: मुख्यमन्त्री मोहन चरण मांझी ह्य: अघोषयत् यत् राष्ट्रीय-पैसा-महोत्सवस्य अवसरेषु राज्यस्य सवेषु पंचायतक्षेत्रेषु अधि विशेष ग्राम-सभानाम् आयोजनं भविष्यति।

इसरो

भारतीय अन्तरिक्ष अनुसंधान-संघटनम् अद्य प्रात: चतु: पंचाशत्र निमेषोत्तर-अष्टवादने न्यूस्पेस इडिया लिमिटेड इत्यनेन एल.वी.एम. त्रि.एम. षड् मिशन-इत्यस्य अन्तर्गत ब्लू-बर्ड ब्लॉक द्वि -संचार उपग्रहस्य पक्षेपणं विधास्यते। इदं प्रक्षेपणम् श्रीहरिकोटा इत्यत्र सतीश धवन अंतरिक्ष केन्द्रस्य द्वितीयस्मात् प्रक्षेपण स्थलात् भविष्यति।

दिल्ली-शीतकालिक:

दिल्ली विधान सभायां शीतकालिंक संत्र जनवरी मासस्य पंचमदिनाड्कात् भविष्यति।

।। इति वार्ता:।।